# Master of Arts Examination, 2024

**(1st Year, 1st Semester)**

**Sanskrit**

**Course : V**

**[ Elements of Literary Criticism ]**

*Time* : 2 Hours *Full Marks* : 30

*The figures in the margin indicate full marks.*

## विभागः–क

**1.** अधोलिखिताः प्रश्नाः संस्कृतभाषया देवनागरीलिपिमाश्रित्य च समाधेयाः।

(क) मम्मटमते अवरकाव्यस्य लक्षणं देयम्। 1

(ख) वैयाकरणमते ध्वनिशब्दस्य कोऽर्थः? 1

(ग) उदाहरणेन सह वाचकशब्दस्य लक्षणं देयम्। 1

(घ) 'इति हेतुस्तदुद्भवे' — कस्मिन् प्रसङ्गे उक्तमिदम्? अत्र 'हेतुः' इति शब्दः कस्मात् कारणात् प्रयुक्तम्? ½+1½

**2.** अधोलिखितेषु **द्वयमा**श्रित्य व्याख्या कार्या : 5×2=10

(क) गौः शुक्लश्चलो डित्थ इति चतुष्टयी शब्दानां प्रवृत्तिः

(ख) परार्थं स्वसमर्पणम्

(ग) सारोपा-लक्षणा

(घ) हेत्वभावान्न लक्षणा

**विभागः-ख**

**3.** अधोलिखितेषु कस्यापि **एकस्य** लक्षणमुदाहरणं चोल्लिख्य व्याख्या कार्या : 6

उत्प्रेक्षा, अर्थान्तरन्यासः

**4.** अधोलिखितेषु युगलेषु **एकस्य** सादृश्यं वैसादृश्यं च आलोच्यताम् : 5

श्रौती उपमा/आर्थी उपमा

दृष्टान्तः/निदर्शना

**5.** लक्षणमुल्लिख्य अलंकारो निरूपणीयः। 4

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्द्ध्यानव्यसनरसिका रात्रिकापालिकीयम्।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन।।





**( अथवा )**

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम्।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम्।

★★★